# shrIhanumatsvaramAlAstotram

# શ્રીહનુમત્સ્વરમાલાસ્તોત્રમ્

## Document Information

Text title : hanumatstotram svaramAlA

File name : hanumatstotramsvaramAlA.itx

Category : hanumaana

Location : doc_hanumaana

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, Shankara

Latest update : September 27, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

shrIhanumatsvaramAlAstotram

# શ્રીહનુમત્સ્વરમાલાસ્તોત્રમ્

અઞ્જનાગર્ભસમ્ભૂતં અગ્નિમિત્રસ્ય પુત્રકમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૧॥

આદિત્યસદૃશં બાલં અરુણોદયસમ્ભવમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૨॥

ઇઙ્ગિતજ્ઞસ્ય રામસ્ય દૂતકાર્યપરાયણમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૩॥

ઈશ્વરસ્યાંશસમ્ભૂતં ઈષણારહિતં હરિમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૪॥

ઉદધિક્રમણં વીરં ઉદારચરિતં વિભુમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૫॥

ઊરુવેગોત્થિતા વૃક્ષા મુહૂર્તં કપિમન્વયુઃ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૬॥

ઋક્શાખાધ્યાયિનં શાન્તં મૃગ્યમાણપદાર્ચિતમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૭॥

ૠકારાદ્યક્ષરોત્પત્તિ જ્ઞાનપૂરિતમાનસમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૮॥

ઌ ઇત્યાદિવર્ણાનાં ઉચ્ચારણવિધાયકમ્ । ઌૡ
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૯॥

એધમાનશરીરં તં રાજમાનમુખાકૃતિમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૧૦॥

ઐક્ષ્વાકુકુલવીરસ્ય રામસ્ય પ્રિયપાત્રકમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૧૧॥

ઓષધાદ્રિસમાનીતદિવ્યૌષધિસમન્વિતમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૧૨॥

ઔત્સુક્યમાત્રકાલેન શત્રુક્ષયકરં વિભુમ્ ।
નમામિ રામદૂતં તં સર્વકાર્યાર્થસિદ્ધયે ॥ ૧૩॥

ઇતિ શ્રીહનુમત્સ્વરમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by PSA Easwaran
Proforead by PSA Easwaran, Shankara

*shrIhanumatsvaramAlAstotram*
pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*